Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 3 | ISSN : 2582-0095

# व्याकरणशास्त्रस्य वैशिष्ट्यम् महत्त्वञ्च

विपिन कुमार
शोधच्छात्रः,
श्रीसोमनाथसंस्कृतविश्वविद्यालयः,
भारतम्



**सारांशः** – व्याकरणं साधुशब्दानामन्वाख्यायकम्। साधुत्वञ्च वैयाकरणमते पुण्यजनकत्वम्–एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति। व्याकरणमपवर्गस्य अज्ञानबन्धनदुःखान्मोक्षस्य ब्रह्मसाक्षात्कारस्य साधनम् अस्ति। शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति। अस्य शास्त्रस्योद्देश्यं पदपदार्थज्ञानमेव न, अपितु धर्मार्थकाममोक्षश्च चतुर्विध पुरूषार्थस्य प्राप्तिरपि भवेदीति।

मुख्यशब्दः – व्याकरणं,शास्त्रम्, मुखम्, पाणिनिः,भाषा,सस्कृतम्।

व्याकरणं तु वेदपुरुषस्य मुखरुपेण कल्पितमस्ति। वेदानां मुख्यमङ्गं व्याकरणम्। अत एवोक्तम्–''मुखं व्याकरणं स्मृतम्।'' संस्कृतवाङ्मये प्रयुक्तानां शब्दानां साध्वसाधुशब्दयोः आहोस्वित् शुद्धशुद्धयोः विचारः व्याकरणेनैव क्रियते। ऋग्वेदकालतः एव व्याकरणशास्त्रस्य निर्देशः समुपलभ्यते, किन्तु व्याकरणस्य उत्पत्तिकथा तैत्तिरीयसंहितायां वर्णितास्ति। महर्षेः यास्कस्य निरुक्तग्रन्थे तु व्याकरणस्य अनेकेषां पारिभाषिकशब्दाानां प्रयोगः समुपलभ्यते। व्याकरणस्य लब्धप्रतिष्ठाचार्यः पाणिनिः स्वपूर्ववर्तिनां वैयाकरणानां नाम निर्देशं चकार। पाणिनिः अष्टाध्यायीग्रन्थद्वारा लौकिकसंस्कृतभाषां व्यवस्थापयामास। इत्थं शब्दानुशासनं अष्टाध्यायी वा व्याकरणवेदांगस्य प्रतिनिधिग्रन्थः अस्ति। अस्य वेदाङ्गस्यैकमात्रमुद्देश्यमस्ति वेदार्थावबोधनं वेदरक्षणञ्च। उक्तञ्च पतञ्जलिना महाभाष्ये–''**रक्षार्थं वेदानामध्येयं व्याकरणम्**'' इति।[1]

स्थूलरुपेण संस्कृतवाङ्मयं द्विधा विभक्तं –वैदिकं लौकिकञ्चेति। व्याकरणं तावद् द्विविधानामपि शब्दानुशासनं विदधाति–वैदिकानां लौकिकानां चेति। तथा चोक्तम्भाष्यकारेण –केषां शब्दानां ? **''वैदिकानां लौकिकानाञ्च।''**[2] तदिदं व्याकरणं वैदिकं व्याकरणम् लौकिकं व्याकरणं चेति द्विधा वक्तुम् शक्यते।

**व्याकरणपदार्थः–**

व्यारणशब्दः 'वि' इति उपसर्गेण 'आङ्' इति उपसर्गेण च 'कृ'धातोः करणकारके ल्युट् प्रत्यये कृते सति सिद्धयति। व्याक्रियन्ते=व्युत्पाद्यन्ते प्रकृतिप्रत्ययकल्पनया ज्ञाप्यन्ते पुण्यजनकाः शब्दाः येन तद् व्याकरणम् वर्तते

इति व्याकरणस्य यौगिकः अर्थः। यत् शास्त्रं प्रकृतिप्रत्ययविभागद्वारा साधुशब्दान् ज्ञापयति तदेव व्याकरणं कथ्यते। अस्यैव नाम शब्दशास्त्रम्,पदशास्त्रम्,लक्षणशास्त्रम्, करणशास्त्रम्,सूत्रशास्त्रम्,शब्दानुशासनं इत्यादि वर्तते। व्याकरणस्य अर्थः शब्दशास्त्रं विद्यते। अस्मिन् अर्थे अस्य शब्दस्य प्रयोगः प्राचीनतमः वर्तते। वाल्मीकिरामायणे व्याकरणस्य शब्दशास्त्ररूपेऽर्थे प्रयोगः दृश्यते। भगवान् रामः हनुमतः विषये कथयति यत् हनुमता सर्वं व्याकरणं पठितम्। अत एव हनुमतः वचने कापि अशुद्धिः नास्ति।

**"नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।**

**बहु व्याहरतानेने न किञ्चिदपभाषितम्।।**[3]

एवं गोपथब्राह्मणे मुण्डकोपनिषदि महाभारते च व्याकरणशब्दस्य प्रयोगः शब्दशास्त्र रूपे अर्थे लभ्यते। व्याकरणविषये महाभारते एवं लिखितं वर्तते–

**सर्वार्थानां व्याकरणाद् वैयाकरणं उच्यते।**

**तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा।।**[4]

**वैशिष्ट्यम् महत्त्वञ्च–**

सर्वेषां मानवानां परस्परं व्यवहर्तुं साधनं भाषा। सा च द्विधा शाब्दिकी साङ्केतिकी च। तत्र शब्दशास्त्रं वाक्यानां प्रयोगो लेखने प्रबन्धनिर्माणे च नितरामपेक्षते। अन्यथा लिङ्गवचनोच्चारणादिषु दोषाः स्युः। शब्दसाधुत्वविषये यथोक्तं महामुनिना साधुत्वज्ञान विषया सैषा व्याकरणस्मृतिः साधुशब्दानां ज्ञानं व्याकरणादेव भवति। व्याक्रियन्ते व्युत्पाद्यन्ते साधुशब्दा इति व्युत्पत्तिलाभात्। यथा–**एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति।**[5]

वैयाकरणा एव इन्द्रशत्रुर्वर्धस्व इत्यत्र समासस्वरं निश्चेतुं पारयन्ति। अत एव व्याकरणस्य पञ्चविधेषु प्रयोजनेष्वन्यतमं प्रयोजनं रक्षेति स्वीक्रियते।

**रक्षोहागमलघ्वसन्देहाः प्रयोजनम्।**[6]

रक्षार्थं वेदानामध्येयं व्याकरणम्। यो हि व्याकरणं जानाति स एव शास्त्रान्तरं विज्ञातुं शक्नोति। यो व्याकरणं न वेत्ति स कथमपि शास्त्रान्तरेषु प्रवेष्टुं न शक्नोति।

आचार्यः पतञ्जलिः व्याकरणस्यस्वरूपं तस्योपयोगिताश्च निरूपयति–

**वर्णज्ञानं वाग्विषयो यत्र च ब्रह्मवर्तते।**

**तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थं चोपदिश्यते।।** महाभाष्यम् द्वि.आ,

अक्षरतत्वं ब्रह्मतत्वं प्रतिभासाक्षात्करणाय च व्याकरणस्य आवश्यता वरीवर्ति। व्याकरणशास्त्रमभीष्टसिद्धेः सरलसाधनमिति मन्यते। अन्यच्च सत्यासत्यज्ञानाय विवेचनाय वा, प्रकृतिप्रत्ययविभागज्ञानपूर्वकलौकिकवैदिकसमस्तशब्दानां स्वरूपज्ञानाय व्याकरणस्य अनिवार्यता अपरिहार्या। शब्दस्वरूपावबोधकत्वात् व्याकरणं शब्दज्ञानेन अज्ञानकृतपापं निवर्त्य अदृष्टस्योत्पादनं साधयति।

वैयाकरणा एव श्वनजः स्वजनः सकलम् शकलम् सकृत् शकृत् इत्येतेषां शब्दानामर्थभेदकं ज्ञातुं शक्नोति। यथाह–

**यद्यपि बहुनाऽधीषे तथापि पठ पुत्र व्याकरणम्।**

**स्वजनः श्वजनो मा भूत् सकलः शकलः सकृच्छकृत्।।**[7]

अतः साधुशब्दज्ञानमूलकं व्याकरणम्। व्याकरणज्ञो नरः साधुशब्दप्रयोगे कुशलो भवति।

सर्वैरेव ज्ञायते यद् चत्वारो वेदाः सर्वज्ञानराशिः यथोक्तम्–

**सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक्।**

**वेद शब्देभ्य एवादौ पृथक्ब संस्थाश्च निर्ममे।।**[8]

छान्दोग्योपनिषदि 'वेदानां वेद' इत्युक्त्वा व्याकरणस्य मुख्यत्वं निर्णीतम्। वैदिकलौकिकशब्दानां स्वरूपसंस्कारः व्याकरणेनैव संभवति। अतः शब्दस्वरूपः वेदब्रह्मणः साक्षादुपकारकः तथा च ब्रह्मचर्याधः शयन चान्द्रायणादि तपेभ्यो उत्तमं तप इति।

अतः पदपर्थविवेचनादिदृष्टस्यपरमार्थादिदृष्टस्य प्रतिपादकं व्याकरणं वेदस्य महत्त्वं प्रतिपादयत। तथोक्तं भर्तृहरिणा–

**आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।**

**प्रथमं छन्दसामङ्गं प्राहुः व्याकरणं बुधाः।।**[9]

''शब्दकारणमर्थस्य'' इति वचनेनार्थबोधाय शब्दानां प्रवृत्तिः। अर्थबोधस्य कारणं शब्द एव। भाष्यकारोऽपि उवाच–अर्थनिमित्तक एव शब्दः। इत्थं च यथार्थावबोधस्य कारणं साधुशब्द एव। साधुशब्दस्य कारणं व्याकरणं भवति। व्याकरणं विना शब्दानां तत्त्वावबोधस्यानुपपत्तेः।यस्य शब्दस्यस्वरूपज्ञानं भवति ते शब्दाः एव अर्थप्रवृत्तिविवक्षायाः कारणभूताः भवन्ति। यथा इन्द्रियेण अर्थ प्राप्त्यर्थं विषयविशेषे इन्द्रियविशेषस्य प्रयोगःतथैव अर्थविशेषस्य प्रतिपत्तये योग्यशब्दात्तस्यार्थविवक्षा विधीयते। एवं शब्दस्वरूपबोधेन व्याकरणं तस्यार्थबोधस्य योग्यतां स्पष्टीकरोति। यथोक्तं हरिणा–

**अर्थप्रवृत्तितत्वानां शब्दा एव निबन्धनम्।**

**तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते।।**[10]

शब्दार्थसम्बन्धशब्दप्रवृत्तिनिमित्तज्ञानं व्याकरणसाध्यमेव भवति।

**शब्दार्थसम्बन्धनिमित्ततत्वं वाच्यविशेषेपि च साध्वसाधून्।**

**साधुप्रयोगान्मिताश्च शिष्टान् न वेद यो व्याकरणं न वेद।।**

व्याकरणं मोक्षप्रदाय प्रवेशद्वारम्। मोक्षप्राप्तेः सोपानस्य विद्याश्रेण्याः प्रथमपदन्यासभूमिः राजमार्गश्च व्याकरणम्। भर्तृहरिः व्याकरणस्य दार्शनिकरूपं प्रददौ तथा शब्दस्वरूपस्यततात्विकज्ञानमिदं मोक्षदायकमिति तदुक्तं हरिणा–

**इदमाद्यं पदस्थानं सिद्विसोपानपर्वणाम्।**

**इयं सा मोक्षमाणनामजिह्वा राजपद्धतिः।।**[11]

अथ च शब्दसाधुत्वविचाराय प्रवृत्तं व्याकरणं तु औपनिषदं बह्म अपि प्रापयति। अनेन व्याकरणज्ञानेन मनुष्याः व्यवहारयोग्यतां प्राप्नुवन्ति। ततः पराप्रकृतेर्ज्ञानं भवति। व्याकरणज्ञानेन निःश्रेयः प्राप्तिः। यथा आयुर्वेदशास्त्रं शारीरिकदोषनिवारकमिति स्वीकुर्वन्ति व्याकरणं सकलदोषापहारकमिति प्रतिपादयन्ति। सकलविद्यासु पवित्रतमाविद्या उद्घोषयन्ति। तदाह हरिः–

**तद्द्वारमपवर्गस्य वाङ्गलानां चिकित्सितम्।**

**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते।।**[12]

सर्वासां विद्यानां साधुशब्दोपगृहीतत्वात् शब्दशास्त्रं गृहीत्वैवं शब्दविग्रहाणामुत्तरोत्तरविद्याश्रृङ्खलानां सुखेन ज्ञानप्राप्तेः सुकरतत्वात्। शब्दविद्या मुमूक्षूणां कृते अकण्टकः सरलो सुगमः राजमार्गः सर्वासु विद्यासु राजमानां मोक्षस्यानपेक्षं साक्षात् साधनम्।

तदाह–

**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।**[13]

यथा चिकित्साशास्त्रस्य प्रयोजनं रोगनिवृत्या कायशुद्धिः तथैव व्याकरणशास्त्रस्यापभ्रंशदोषनिवृत्या अन्तः करणशुद्धिः प्रयोजनम्। तथा व्याकरणशास्त्रस्यापभ्रंश दोषनिवृत्या शब्दसाधुत्वज्ञानं साक्षात् प्रयोजनं पर्यवस्यति। तदाह हरिः–

**कायवाग्बुद्धिविषया ये मला समवस्थिताः।**

**चिकित्सालक्षणाध्यात्मशास्त्रैस्तेषां विशुद्धयः।।**[14]

श्रुतयस्तु आनाद्विच्छिन्नाः प्रवाहपरम्पराविच्छेदशून्याः अकर्तृकाः। स्मृतयस्तु शिष्टजनैः निबद्धयन्ते अतः सनिबन्धनाः, किन्तु स्वरूपतः उपनिबध्यमानाः अपि प्रवाहपरम्परया विच्छिन्नाः नैव भवन्ति।

उक्तं च –

**अनादिमव्यछिन्नां श्रुतिमाहुरकर्तृकाम्।**

**शिष्टैर्निबध्यमाना तु न व्यवच्छिद्यते स्मृतिः।।**[15]

वेदविद्भिः आचार्यैः शब्दनिबन्धनत्वात् अशब्दनिबन्धनत्वात् स्मरणमूलकत्वात् दृष्टादृष्टप्रयोजनत्वात् वेदानामाश्रयत्वात् वैदिकलिङ्गाधारेण स्मृतयः उपनिबध्यते। इत्युक्तं–

**स्मृतयो बहुरूपाश्च दृष्टादृष्टप्रयोजनाः।**

**तमेवाश्रित्य लिङ्गेभ्यो वेदविद्भिः प्रकल्पिताः।।**[16]

समस्तस्मृतयः वेदमूलका इत्युक्त्वा आचार्येण भर्तृहरिणा प्रतिपाद्यते यत् तर्कापेक्षया आगमस्य प्रबलत्वात् भ्रम–प्रमाद–विप्रलिप्सादिदोषैरनाक्रान्तस्य अकृतक अपौरुषेय–आम्नायरूपवेदशास्त्रस्य तथा पूर्वस्मृतिमूलकव्याकरणस्मृतीणां प्रमाणमाश्रित्य शिष्टाः पाणिन्यादयः आचार्याः शब्दानुशासनं चकार यथोक्तम्–

**तस्मादकृतकं शास्त्रं स्मृतिं च सनिबन्धनात्।**

**आश्रित्यारभ्यते शिष्टैः शब्दानामनुशासनम्।।**[17]

वेदविहित अपरापरा विद्ययोः शिक्षाकल्पव्याकरण–निरुक्तच्छन्दोज्योतींषि इति षड्ङ्गो वेदोऽध्येयो ज्ञेयश्च प्रधानञ्च कृतो यत्नः फलवान् भवतीति व्याकरणमेव परिलक्ष्यते। अर्थात् षट्सु अङ्गेषु प्रधानं व्याकरणमेव। श्रूयते हि 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च इति। निष्कारणो हि दृष्टकारणनिरपेक्षो नित्य इति यावत्। तथा च साङ्गवेदाध्ययनतदर्थज्ञानरूपोऽयं धर्मो नित्यः सन्ध्योपासनवदित्यर्थः। व्याकरणस्य वेदाङ्गत्वं चाङ्गत्वेन संस्तवादुपकारकत्वाद् वा। इदं हि अर्थविशेषामाश्रित्य स्वरविशेषादीन् विदधत् पदपदार्थविशेषनिर्णये समुपयुज्यते। व्याकरणं साधुशब्दानामन्वाख्यायकम्। यथोक्तं–

साधुत्वज्ञानविषया सैषा व्याकणस्मृतिः। पाणिनीय व्याकरण–सिद्धान्तानुसारेण पुण्यजनकत्वरूपसाधुत्ववतां शब्दानामुपदेशतया स्मृतिपदवी मारोहति। व्यवहारे च तदेव प्रसिद्धयति,यस्य प्रामाण्यं निःसन्दिग्धं भवति। वेदाः प्रमाणमितिवद् वेदमूलकत्वात् स्मृतेरपि प्रामाण्यं सम्मतम्। साधुशब्दानां धर्मसाधुत्वव्यवस्थायै तद्बोधकपाणिनीयव्याकरणस्याविच्छिन्नशिष्टसदाचारानुमितपूर्व स्मृतिमूलत्वेन प्रामाण्यमुपपन्नम्।

शब्दधर्मिकसाधुत्वप्रकारकप्रकारकज्ञानकरणमिदं शब्दानुशासनं नाम व्याकरणस्मृतिः। असाधुभ्यो विविच्य साधुशब्दनिर्वचमस्याः प्रतिपाद्यो विषयः। सा चैषा प्रवाहनित्या अविच्छिन्नस्वरूपा। यथा भक्ष्याभक्ष्यगम्यागम्यादिविधिनिषेधविषयाः स्मृतयो अनादिपरम्परातः सन्त्युपनिबद्धाः तथा च वाच्यावाच्यसाध्वसाधुशासनविषयेयं व्याकरणस्मृतिरपि। कः शब्दः पुण्यजनको को वा नेति लोकतोऽधारयितुमशक्यस्य व्याकरणस्मृतिद्वारैव ज्ञात्वाऽस्माभिः व्यवह्रियते। कात्यायनमुनिनापि स्पष्टमुक्तम्–

**लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः।**[18]

अथ च –

**दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।**

**य वाग्व्रजो यजमानं हिनस्ति यथेद्रशत्रुःस्वरतोऽपराधात्।।** महाभाष्यम् प्र.आ.

शिक्षाग्रन्थेषु अपीदमुपलभ्यते। अत्र मिथ्याप्रयुक्तः यदर्थप्रतिपादनाय प्रयुक्तस्ततोऽर्थान्तरं स्वरवर्णदोषात्प्रतिपादयन् तमर्थं नाहेत्यर्थः। वागेव वज्रः हिंसकत्वात् यजमानं हिनस्तीति। यथाध्वर्युकृताद्धोमाद् यजमाने धर्मोत्पत्तिः,एवमाध्वर्युकृतादपशब्दप्रयोगाद् यजमाने प्रत्यवायोऽपि। यथा–इन्द्रशत्रुशब्दोऽत्र। तदेवं यज्ञादीनां विपरीतं फलमन्यथा वा फलं मा भूदित्येतदर्थं व्याकरणस्य प्रासङ्गिकत्वं सिद्धयति।

अपि च–लोकव्यवहार सम्पादनाय लोके कथमभिवादनं विधेयमिति निगदितम्। तदेव अभिवादनाय भगवता पाणिनिनापि ''प्रत्यभिवादेऽशूद्रे'' इति सूत्रं प्रणिनय। स्मृतिरपि अब्रवीत्–

**आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने।**

**अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरः प्लुतः।।**

इदत्र्च व्याकरणशास्त्रं ज्योतिषामपि ज्योतिः, यतो हि शब्दो ज्योतिः,तस्य प्रकाशनं अन्वाख्यानं प्रकृतिप्रत्यय–तदर्थप्रतिपादनं व्याकरणमेव करोति।

**इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।**

**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।** काव्यादर्शः

अपि च–

**उपासनीयं यत्नेन शास्त्रं व्याकरणं महत्।**

**प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम्।।**

**रूपान्तरेण ते देवा विचरन्ति महीतले।**

**ये व्याकरणसंस्कारपवित्रितमुखाः नराः।।**

व्याकरणेन शब्दानां प्रवृत्तिनिमित्तव्याख्यानम् आचार्यैरभिष्टम् इति।

तदाह–

**व्याक्रियते इत्यनेन द्वारेण शब्दप्रवृत्तिनिमित्तमाचिख्यासन्नुपन्यासं करोति।**

**शब्दो हि कश्चित् तुल्यरूपः प्रवर्तमानो भिन्ननिमित्तः परस्परमनपेक्षमाणः प्रवर्तते।**

एतत्तुल्यशब्दस्य प्रवृत्तिनिमित्तस्य व्याख्या व्याकरणेन क्रियते। शब्दप्रवृत्तेः तत्वज्ञानेन शब्दब्रह्मणः उपलब्धिर्भवति।

लक्षणप्रपञ्चेन व्याकरणं वर्णपदवाक्यरूपसूक्ष्मवाण्याः परमसारभूतस्य पवित्रतमप्रकाशस्वरूपस्य शब्दब्रह्मणः तात्विकज्ञानस्य सुगमसाधनम्। यथोक्तम्–

**प्राप्तरूपविभागायाः यो वाचः परमो रसः।**

**यत्तत्पुण्यतमं ज्योतिस्तस्य मार्गोऽयमात्रजसः।।**[19]

अत्र आत्रजसः इत्यस्यार्थः लघुतमः ऋजुतमः इति। भर्तृहरिराह यथा–व्याकरणं लघुरुपायः शब्दज्ञानं प्रति,अन्य उपायः एवं न सम्भवति। एवं हि लघुनोपायेन व्याकरणरूपेण साधुशब्दौघान् वयं जानीमहे।

**उपसंहारः–**

व्याकरणं साधुशब्दानामन्वाख्यायकम्। साधुत्वञ्च वैयाकरणमते पुण्यजनकत्वम्–एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति। व्याकरणमपवर्गस्य अज्ञानबन्धनदुःखान्मोक्षस्य ब्रह्मसाक्षात्कारस्य साधनम् अस्ति। शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति। अस्य शास्त्रस्योद्देश्यं पदपदार्थज्ञानमेव न, अपितु धर्मार्थकाममोक्षश्च चतुर्विध पुरूषार्थस्य प्राप्तिरपि भवेदीति।

**सन्दर्भाः–**


1. महाभाष्यम्,व्याख्याकारः–युधिष्ठिर मीमांसकः, 1.1.आह्निक–1
2. तदेव
3. संस्कृत व्याकरणशास्त्र का इतिहास,प्रथम भाग,पृष्ठ–60

4. तदेव, पृष्ठ–61
5. महाभाष्यम्, पस्पशाहिनकम्, पृष्ठ–6
6. तदेव
7. प्रकीर्णोऽयं श्लोकः,
संस्कृतदिग्दर्शिका, डॉ अनिल कुमार झा, पृ–141
8. मनुस्मृतिः, श्लोक–21
9. वाक्यपदीयम्, ब्रह्मकाण्डम्, श्लोक–11
10. वाक्यपदीयम्, ब्रह्मकाण्डम्, श्लोक–13
11. तदेव श्लोक,16
12. वाक्यपदीयम् 1.14
13. ब्रह्मबिन्दुपनिषदि
14. वाक्यपदीयम्, ब्रह्मकाण्डम्, श्लोक 44
15. वाक्यपदीयम्, 1.144
16. तदेव, श्लोक 17
17. तदेव श्लोक 1.43
18. महाभाष्यम्, प्रथमाह्निकम्
19. वाक्यपदीयम् 1.12

**सहायकग्रन्थसूची–**

1. वाक्यपदीयम्, सूर्यनारायण शुक्ल, चौखम्बा संस्कृत संस्थान,प्रकाशनवर्षम्,2016
2. महाभाष्यम्,युधिष्ठिर मीमांसक, रामलाल कपूर ट्रस्ट,सोनीपत, हरियाणा
3. संस्कृतवाङ्मयैतिह्येवैदिकवाङ्मयम्, डॉ अशोकचन्द्रगौड़ शास्त्री, नाग पब्लिशर्स
4. संस्कृत पठनपाठन की अनुभूत सरलतम विधि,पं ब्रह्मदत्त जिज्ञासु,प्रकाशनवर्षम् 2000
5. काव्यमीमांसा, राजशेखरः
6. महाभाष्यम्, दूरस्थशिक्षा,राष्ट्रियसंस्कृतसंस्थानम्, नव दिल्ली
7- मनुस्मृतिः, डॉ सुरेन्द्र कुमार